**1 °तित्वे त्वेकं ]** $E_dB_1^{pc}B_2^{pc}L_1R_1V_1$; °तित्वे कं $B_1^{ac}$; °तित्वे त्वेको $B_2^{ac}$; °तिकं त्वे $B_3$; °तत्वे त्वेकं $G_1$ **1 °र्थमिन्द्रियम् ]** $B_1B_2B_3L_1R_1V_1$; °र्थं $E_d$; °र्थ $G_1$ **2 °मीयते ]** $E_dB_1B_3G_1R_1$; °मीयते इति $B_2L_1V_1$ **3 °ञ्चत्वात् ]** $E_dB_2G_1L_1R_1V_1$; °ञ्चत्वाच्च $B_1B_3$ **4 ऽपि ]** $B_1B_2B_3L_1R_1V_1$; om. $E_dG_1$ **4 °दुपलम्भात् ]** $E_dB_1^{pc}B_2B_3^{pc}G_1L_1R_1V_1$; °दुपालम्भात् $B_1^{ac}B_3^{ac}$ **4 तानी° ]** $E_dB_1B_2B_3^{pc}G_1L_1R_1V_1$; तानि $B_3^{ac}$ **5 °द्बन्धन° ]** $E_dB_1B_2B_3G_1L_1V_1$; °बन्ध° $R_1$ **5 मुमुक्षुणा ]** $E_dB_1B_2G_1L_1R_1V_1$; मुमुक्षूणां $B_3$ **7 °स्पर्शशब्दाः ]** $B_1B_2B_3G_1L_1R_1V_1$; °शब्दस्पर्शाः $E_d$ **7 गन्ध° ]** $E_dB_1B_2B_3L_1R_1V_1$; ++ $G_1$ **8 °रसरूप° ]** $E_dB_1B_2B_3G_1L_1V_1$; °रूपरस° $R_1$ **8 °स्पर्शाश्चत्वारः ]** $B_1B_2B_3R_1$; °स्पर्शाः $E_dG_1$; °स्पर्शचत्वारः $L_1$; °स्पर्शा चत्वारः $V_1$ **8 पृथिव्या ]** $B_1^{ac}B_3$; पृथिवी° $E_dB_1^{pc}B_2^{pc}G_1L_1R_1V_1$; पृथिव्यादि° $B_2^{ac}$ **8 गुणाः ]** $E_dB_1B_2B_3G_1L_1R_1$; गुणः $V_1$ **9 द्वौ गुणौ ]** $B_1B_2B_3L_1R_1V_1$; द्वौ $E_dG_1$ **10 सर्वगुणत्वं ]** $E_dB_1B_2B_3G_1L_1^{pc}R_1V_1$; गुणत्वं $L_1^{ac}$ **10 °प्येकगुण° ]** $E_dB_1B_3$; °प्येकैकगुण° $B_2G_1L_1R_1V_1$ **10 °नुपलम्भात् ]** $E_dB_1^{pc}B_2B_3G_1L_1R_1V_1$; °नुलम्भात् $B_1^{ac}$

त इमे भोग्या इन्द्रियार्था बन्धहेतव इति मुमुक्षुणा हेयाः। यद्यपि तदाश्रयस्यावयविनो द्रव्यस्य गुणान्तराणां परिमाणादीनां कर्मणश्च रागकारणता विद्यत एव, तथापि गन्धादयः प्राधान्येनासक्तिहेतव इति हेयतयेह निर्दिष्टाः।

[2.3.5 बुद्धिः]

बुद्धिरुपलब्धिर्ज्ञानं दर्शनमिति पर्यायाः। न पुनरचेतनाया बुद्धेर्ज्ञानं वृत्तिः। पुरुषस्य चेतनस्योपलब्धिर्दर्शनमिति पुरुष एवोपलभते बुध्यते पश्यति जानीत इति। स क्षणिको ऽस्य गुणो बुद्धिर्नामेति। सा च भोगस्वभावत्वात्संसारकारणमिति मुमुक्षुणा हेया।

---

**1** *Nyāyasūtra* 4.2.3 (quoted in NM II 382): तन्निमित्तं त्ववयव्यभिमानः।
**6** *Nyāyasūtra* 1.1.15 (quoted in NM II 386): बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्॥

---

**1** NM II 382　**6** NM II 387　**8** NM II 407

---

**1 त इमे** ] $E_dB_1^{pc}B_2B_3G_1L_1V_1$; इमे $B_1^{ac}$; इत इमे $R_1$　**1 मुमुक्षुणा** ] $E_dB_1B_2G_1L_1V_1$; मुमुक्षूणां $B_3R_1$　**2 परिमाणा°** ] $E_dB_1B_2^{pc}G_1L_1R_1$; परिणामा° $B_2^{ac}$; परिमला° $B_3$; परिमाना° $V_1$　**2 कर्मणश्च** ] $E_dB_1B_3G_1L_1R_1V_1$; कर्मणो $B_2$　**3 विद्यत एव** ] $E_dB_1B_2B_3G_1L_1V_1$; विद्यते $R_1$　**4 हेयतयेह** ] $B_1B_2^{pc}B_3L_1R_1V_1$; हेयतयैव $E_dG_1$; हेयतयेव $B_2^{ac}$　**6 बुद्धिरुप°** ] $B_1B_2B_3G_1L_1R_1V_1$; बुद्धिरूप° $E_d$　**6 °ज्ञानं दर्शन°** ] $B_1B_2B_3R_1$; °दर्शन° $E_dG_1$; °ज्ञानं प्रतीतिदर्शन° $L_1V_1$　**6 °मिति ··· °मिति** ] $E_dB_1B_2B_3G_1L_1V_1$; °मिति $R_1$(eyeskip) **6 पर्यायाः** ] $E_dB_2B_3^{pc}L_1V_1$; पर्यायः $B_1B_3^{ac}G_1$　**6 पुनर°** ] $E_dB_1B_2B_3G_1$; पुनः सांख्यमतेना° $L_1V_1$　**6 °चेतनाया** ] $E_dB_1B_2L_1V_1$; °चेतनतया $B_3$; °चेतनाया नित्याया $G_1$　**7 °लब्धिर्दर्शन°** ] $B_1B_2B_3G_1L_1$; °लब्धिदर्शन° $E_dV_1$ **7 पुरुष** ] $E_dB_1^{pc}B_2B_3G_1L_1R_1V_1$; पुरु $B_1^{ac}$　**8 बुध्यते पश्यति** ] $B_1B_3$; पश्यति बुध्यते $E_dB_2G_1L_1V_1$; पश्यति बुध्यति $R_1$　**8 जानीत इति** ] $E_dB_1B_3G_1R_1$; जानातीति $B_2L_1V_1$　**8 स** ] $B_1B_2B_3G_1L_1R_1V_1$; सा $E_d$　**8 क्षणिको** ] $B_1B_2B_3L_1R_1V_1$; क्षणिका $E_dG_1$　**8 ऽस्य** ] $B_1B_2B_3L_1R_1V_1$; यस्य $E_d$; ++ $G_1$ **8 बुद्धिर्नामेति** ] $B_1B_2B_3G_1L_1R_1V_1$; बुद्धिः स आत्मेति $E_d$　**9 °भावत्वात्सं°** ] $E_dB_1B_2^{pc}G_1$; °भावात्सं° $B_2^{ac}B_3L_1R_1V_1$　**9 मुमुक्षुणा** ] $E_dB_1B_2G_1L_1R_1$; मुमुक्षूणां $B_3$; मुमुणा $V_1$(marked)

[2.3.6 मनः]

इन्द्रियार्थसन्निकर्षे सत्यपि युगपज्ज्ञानानुत्पादाद् आन्तरसुखादिविषयोपलब्धेश्च बाह्यगन्धादिविषयोपलब्धिवत्करणसाध्यत्वाद् आन्तरं करणं मनो ऽनुमीयते। तच्चाणु वेगवदाशुसंचारि नित्यम्। अन्यथा तत्कार्यनियमासिद्धिः। तदपि भोगसाधनत्वाद्बन्धकारणमिति मुमुक्षुणा हेयम्।

[2.3.7 प्रवृत्तिः]

वाङ्मनःकायव्यापारः शुभाशुभफलः प्रवृत्तिरित्युच्यते। सा च धर्माधर्माख्यसंस्कारोत्पादनद्वारेण स्वर्गनरकहेतुरिति मुमुक्षुणा यत्नतो हेया। कर्मत्यागाद्धि मोक्षमाचक्षते।

---

**2** *Nyāyasūtra* 1.1.16 (quoted in NM II 408): युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्॥
**8** *Nyāyasūtra* 1.1.17 (quoted in NM II 413): प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति॥; *Syādvādaratnākara* 971.7 (Marui [2000:103, n.20]): वाङ्मनःकायव्यापारः शुभाशुभफलप्रवृत्तिरित्युच्यते।

---

**2** NM II 409  **4** NM II 410  **8** NM II 413

---

**2** °त्पादाद् आ° ] $E_dB_1^{pc}B_2B_3G_1L_1R_1V_1$ ; °त्पादा° $B_1^{ac}$  **2** °सुखादि° ] $E_dB_1B_2B_3G_1R_1V_1$ ; °सुषादि° $L_1$(marked)  **3** °त्करण° ] $E_dB_1^{pc}B_2B_3^{pc}G_1L_1R_1V_1$ ; °त्कारण° $B_1^{ac}B_3^{ac}$  **4** करणं ] $E_dB_1B_2B_3G_1R_1V_1$ ; करण $L_1$  **4** तच्चाणु ] $E_dB_2G_1R_1V_1$ ; तच्च मनो ऽणु $B_1B_3$ ; तच्च $L_1$  **5** अन्यथा तत्का° ] $E_dB_1B_2B_3L_1R_1V_1$ ; अ++++ $G_1$  **5** °सिद्धिः ] $E_dB_1B_3G_1L_1R_1V_1$ ; °सिद्धेः $B_2$ **5** °कारणमिति ] $E_dB_1B_2^{pc}B_3G_1R_1$ ; °कारण° $B_2^{ac}$ ; °कारणं $L_1V_1$  **6** मुमुक्षुणा ] $E_dB_1B_2G_1L_1R_1V_1$ ; मुमुक्षूणां $B_3$  **8** °व्यापारः ] $E_dB_2B_3G_1L_1R_1$ ; °व्यापरः $B_1$ ; °व्यापारा $V_1$  **8** °शुभफलः ] $B_1^{pc}B_2B_3L_1R_1V_1$ ; °शुभफला $E_dG_1$ ; °शुभफल° $B_2^{ac}$  **9** मुमुक्षुणा ] $E_dB_1B_2G_1L_1R_1V_1$ ; मुमुक्षूणां $B_3$

### [2.3.8 दोषाः]

पुरुषस्य कर्मसु प्रवर्तयितारो रागद्वेषमोहास्त्रयो दोषाः। ईर्ष्यादीनामेष्वेवान्तर्भावः। तत्कृतश्चैष संसार इति मुमुक्षुणा प्रतिपक्षभावनया क्षपणीयाः।

### [2.3.9 प्रेत्यभावः]

देहेन्द्रियादिसंघातस्य प्राक्तनस्य त्यागेन सङ्घातान्तरग्रहणं प्रेत्यभावः। एष एव च संसार इति मुमुक्षुणा हेयः।

---

**2** *Nyāyasūtra* 1.1.18 (quoted in NM II 415): प्रवर्तनालक्षणा दोषाः॥; *Syādvādaratnākara* 971.8 (Marui [2000:103,n.20]): पुरुषस्य कर्मसु प्रवर्तयितारो रागद्वेषमोहा दोषाः।
**6** *Nyāyasūtra* 1.1.19 (quoted in NM II 418): पुनरुत्पत्तिः प्रेत्यभावः॥; *Syādvādaratnākara* 971.8–9 (Marui [2000:103,n.20]): देहेन्द्रियादिसंघातस्य संघातान्तरग्रहणं प्रेत्यभावः।

---

**2** NM II 415 **6** NM II 418 **7** NM II 424

---

**2** प्रवर्तयितारो ] $E_dB_2B_3G_1L_1R_1V_1$ ; वृत्तयितारो $B_1^{ac}$ ; प्रवृत्तयितारो $B_1^{pc}$ **2** राग॰ ] $E_dB_1B_2^{pc}G_1L_1R_1V_1$ ; राराग॰ $B_2^{ac}$ ; ग॰ $B_3$ **2** ॰मोहास्त्रयो दोषाः। ईर्ष्यादीनामेष्वेवान्तर्भावः ] $B_1B_2^{pc}B_3G_1L_1R_1V_1$ ; ॰मोहाः $E_d$ ; ॰मोहास्त्रयो द्वेषाः ईर्ष्यार्ष्यादीनामेष्वेवान्तर्भावः $B_2^{ac}$ **3** तत्कृतश्चैष ] $E_dB_1B_2^{pc}B_3G_1L_1R_1V_1$ ; तत्कृश्चैष $B_2^{ac}$ **3** संसार ] $E_dB_1B_2B_3G_1R_1V_1$ ; संस्कार $L_1$ **3** मुमुक्षुणा ] $E_dB_1B_2G_1L_1R_1V_1$ ; मुमुक्षूणां $B_3$ **3** ॰भावनया ] $E_dB_1^{pc}B_2G_1L_1R_1V_1$ ; ॰भावानाया $B_1^{ac}$ ; ॰भावनायां $B_3$ **4** क्षपणीयाः ] $E_dB_1^{pc}G_1$ ; क्षेपणीयाः $B_1^{ac}B_3^{pc}R_1$ ; क्षपनीयाः $B_2L_1$(marked)$V_1$ ; पणयाः $B_3^{ac}$ **6** देहेन्द्रि॰ ] $E_dB_2B_3G_1L_1R_1V_1$ ; देहिन्द्रि॰ $B_1$ **6** प्राक्तनस्य $E_dB_1^{pc}B_2B_3G_1L_1V_1$ ; प्राक्तन॰ $B_1^{ac}R_1$ **7** ॰सार इति ] $E_dB_1B_2^{pc}B_3G_1R_1$ ; ॰सारो $B_2^{ac}L_1V_1$ **7** मुमुक्षुणा ] $E_dB_1B_2G_1L_1R_1V_1$ ; मुमुक्षूणां $B_3$ **7** हेयः ] $E_dB_1B_2B_3G_1L_1R_1$ ; हेयाः $V_1$

### [2.3.10 फलम्]

प्रवृत्तिदोषजनितं सुखदुःखात्मकं मुख्यं फलम्। तत्साधनं तु गौणम्। तच्च हेयमिति मुमुक्षुणा भावनीयम्।

### [2.3.11 दुःखम्]

फलग्रहणाक्षिप्तमपि पीडासंतापस्वभावं दुःखमदुःखसंमतस्यापि दुःखत्वभावनार्थमुपदिश्यते। अत एव फलत्वे ऽपि सुखमिह न निर्दिष्टम्।

### [2.3.12 अपवर्गः]

आत्यन्तिको दुःखवियोगो ऽपवर्गः सुखदुःखवियुक्तस्यात्मनः स्वरूपावस्थानम्। सुखदुःखयोर्विवेकहानस्याशक्यत्वाद् दुःखं जिहासुः सुखमपि जह्यात्। तस्मात्परमः पुरुषार्थो ऽपवर्गः।

स च तत्त्वज्ञानादवाप्यते। मिथ्याज्ञानमूलो हि संसारः। तत्त्व-

---

**2** *Nyāyasūtra* 1.1.20 (quoted in NM II 424): प्रवृत्तिदोषजनितो ऽर्थः फलम्॥
**5** *Nyāyasūtra* 1.1.21 (quoted in NM II 427): बाधनालक्षणं दुःखमिति॥
**9** *Nyāyasūtra* 1.1.22 (quoted in NM II 430): तदत्यन्तविमोक्षो ऽपवर्गः॥

---

**2** NM II 424 **5** NM II 427 **5** NM II 428.18: एवं सर्वमिदं दुःखमिति भावयतो ऽनिशम्। **9** NM II 430 **12** NM II 440

---

**2 प्रवृत्ति°** ] $E_dB_1B_2G_1L_1R_1V_1$ ; प्रवृत्त° $B_3$ **2 °जनितं** ] $B_1B_2B_3L_1R_1V_1$ ; °जनकं $E_dG_1$ **2 सुखदुःखा°** ] $E_dB_1B_2B_3G_1R_1V_1$ ; सुखा° $L_1$ **3 हेयमिति** ] $B_1B_3$ ; हेयमेवेति $E_dB_2G_1L_1R_1V_1$ **5 °ग्रहणा°** ] $B_1B_2B_3G_1R_1$ ; °ग्रहमा° $E_d$ ; °ग्रहणात् $L_1V_1$ **5 पीडासंताप°** ] $B_1B_2^{pc}B_3G_1L_1R_1V_1$ ; पीडन° $E_d$ ; पीडातासन्ताप° $B_2^{ac}$ **5 दुःखमदुःख°** ] $E_dB_1B_2G_1L_1^{pc}R_1V_1$ ; दुःखं $B_3^{ac}$ ; दुःखं अदुःख° $B_3^{pc}$ ; दुःख° $L_1^{ac}$ **5 °संमत°** ] $E_dB_2B_3G_1L_1R_1V_1$ ; °समत° $B_1$ **6 दुःखत्व°** ] $E_dB_1B_3G_1L_1R_1V_1$ ; दुःख° $B_2$ **6 °भावनार्थमु°** ] $E_dB_1B_2G_1L_1R_1V_1$ ; °भावनामु° $B_3$ **6 सुखमिह** ] $E_dB_1B_2B_3G_1R_1V_1$ ; मुख्यमिह $L_1$ **9 आत्यन्तिको** ] $E_dB_1B_2G_1L_1R_1V_1$ ; आतिन्तिको $B_3$ **9 सुखदुःख°** ] $B_1B_2B_3L_1R_1$ ; सर्वगुण° $E_dG_1$ ; सर्वदुःख° $V_1$ **10 °शक्यत्वाद् दुः°** ] $B_1B_2B_3G_1L_1R_1V_1$ ; °शक्यता। दुः° $E_d$ **11 °त्परमः** ] $B_2G_1L_1V_1$ ; °त्परम° $E_dB_1B_3R_1$

ज्ञानाच्च मिथ्याज्ञानापायः, तस्य तद्विरोधित्वात्। मिथ्याज्ञानापाये तत्कार्या दोषा अपयन्ति, दोषापाये तत्कार्या प्रवृत्तिरपैति, प्रवृत्त्यपाये तत्कृतं जन्मापैति, जन्मापाये तत्कृतं दुःखमपैति, दुःखापायश्चापवर्ग इति।

[3 संशयः]

[3.1 संशयलक्षणम्]

विशेषस्मृतिहेतोर्धर्मस्य ग्रहणाद् विशेषाग्रहणाद्विशेषस्मृतेश्च जायमानः किं स्विदिति विमर्शः संशयः।

[3.2 संशयविभागः]

स च पञ्चविधः।

---

**1** *Nyāyasūtra* 1.1.2 (quoted in *Nyāyamañjarī* II 440.4–5): दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः॥
**7** *Nyāyasūtra* 1.1.23 (quoted in NM II 522): समानानेकधर्मोपपत्तेर् विप्रतिपत्तेर् उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः॥

---

**7** NM II 523.7–8: विशेषस्मरणकारणभूतसाधारणधर्मग्रहणाद् विशेषाग्रहणाद्विशेषस्मृतेश्च (°षस्मृतेश्च em.; °षास्मृतेश्च ed.) संशयो भवति।; NM I 467.8–10: यथा हि पुरोऽवस्थिते धर्मिण्यूर्ध्वत्वादिसाधारणधर्मग्रहणात् स्थाणुपुरुषगतविशेषाग्रहणादुभयविशेषस्मृतेः संशयो भवति

---

**2** तत्कार्या ] $B_1B_2B_3L_1R_1V_1$; तत्कार्य° $E_dG_1$ **2** अपयन्ति ] em.; अपयान्ति $E_dB_1B_2B_3G_1L_1R_1V_1$ **2** तत्कार्या ] $B_1B_2B_3L_1R_1V_1$; तत्कार्य° $E_dG_1$ **2** प्रवृत्तिरपैति ··· जन्मापैति ] $E_dB_1B_2G_1L_1R_1V_1$; प्रवृत्तिरपैति $B_3$(eyeskip) **3** प्रवृत्त्य° ] $E_dB_1^{pc}B_2G_1L_1R_1V_1$; प्रवृत्त्या° $B_1^{ac}$ **3** °पाये ] $E_dB_1B_2L_1R_1V_1$; °भावे $G_1$ **4** °पायश्चा° ] $E_dB_1^{pc}B_2B_3$; °पायेश्चा° $B_1^{ac}$; ++++ $G_1$; °पायाच्चा° $L_1R_1V_1$ **4** इति ] $E_dB_2G_1L_1R_1V_1$; इति इतिशब्दः प्रमेयपरिसमाप्तौ $B_1B_3$ **7** °र्धर्मस्य ] $E_dB_1B_2B_3G_1R_1V_1$; °र्धर्मस्या° $L_1$ **7** विशेषाग्रहणाद्वि° ] $B_1B_2B_3G_1$; वि° $E_dR_1$(eyeskip); विशेषग्रहणाद्वि° $L_1V_1$ **10** स च ] $E_dB_1B_2^{pc}B_3G_1L_1R_1V_1$; स $B_2^{ac}$

### [3.2.1 साधारणधर्मदर्शनात्]

साधारणधर्मदर्शनात्। यथोर्ध्वत्वदर्शनात् "स्थाणुर्वा पुरुषो वा" इति।

### [3.2.2 असाधारणधर्मग्रहणात्]

असाधारणधर्मग्रहणात्। यथा विभागजत्वात् "शब्दो द्रव्यं गुणो वा" इति संशयो भवति।

### [3.2.3 विप्रतिपत्तेः]

विप्रतिपत्तेः। यथा नित्यत्वानित्यत्वे शब्दस्य संशयः।

### [3.2.4 उपलब्ध्यव्यवस्थातः]

उपलब्ध्यव्यवस्थातः। यथा किंचित्सदुपलभ्यते यथा नद्यादौ जलम्। अन्यदसदुपलभ्यते यथा मरीचिषु जलम्। एवमन्यत्रोपलभ्यमाने संशयो भवति "किं सदुपलभ्यते, उतासत्" इति।

### [3.2.5 अनुपलब्ध्यव्यवस्थातः]

अनुपलब्ध्यव्यवस्थातः। यथा सदपि मृदन्तरितमुदकं नोपलभ्यते,

---

**5** NM II 530 **8** NM II 538 **10** NM II 538 **11** NM I 212.10: **मरीचिषु जलज्ञानं कथमिन्द्रियजं तव।** **14** NM II 538

---

**2 °र्ध्वत्व°** ] $E_dB_1B_2B_3G_1L_1V_1$; **°र्ध्व°** $R_1$ **2 स्थाणुर्वा** ] $E_dB_1B_2B_3G_1R_1V_1$; **स्थाणु** $L_1$ **5 °ग्रहणात्** ] $B_1B_2B_3L_1V_1$; **°दर्शनात्** $E_dG_1R_1$ **6 भवति। विप्रतिपत्तेः। यथा** ] $E_dB_1B_2G_1L_1R_1V_1$; om. $B_3$ **8 नित्यत्वानित्यत्वे** ] $E_dB_1B_2B_3G_1V_1$; **नित्यानित्यत्वे** $L_1$; **नित्यत्वे** $R_1$ **10 °ब्ध्यव्यवस्था°** ] $E_dB_2^{pc}$; **°ब्ध्यवस्था°** $B_1B_2^{ac}B_3G_1L_1R_1V_1$ **10 यथा नद्यादौ** ] $E_dB_1^{pc}B_2B_3^{pc}G_1L_1V_1$; **नद्यादौ** $B_1^{ac}B_3^{ac}R_1$ **11 यथा** ] $E_dB_1B_2^{pc}B_3R_1$; om. $B_2^{ac}G_1L_1V_1$ **11 मरीचिषु** ] $B_1^{ac}B_3$; **मरुमरीचिषु** $E_dB_1^{pc}G_1L_1R_1V_1$; **मरुमरीच्यादिषु** $B_2$ **11 °न्यत्रोप°** ] $B_1B_2B_3G_1L_1R_1V_1$; **°न्यदुप°** $E_d$ **11 °भ्यमाने** ] $E_dB_1B_2B_3G_1R_1$; **°भ्यमानेन** $L_1V_1$ **14 °लब्ध्यव्यवस्था°** ] $E_dB_2^{pc}$; **°लब्ध्यवस्था°** $B_1B_2^{ac}B_3G_1L_1R_1V_1$

असच्च खपुष्पादि नोपलभ्यते। ततो ऽन्यत्रानुपलभ्यमाने संशयो भवति “किं सन्नोपलभ्यते, उतासत्” इति।

## [3.3 पृथगुपदेशसमर्थनम्]

स चायं संशयः प्रमाणप्रमेयान्तर्भूतो ऽपि न्यायप्रवृत्त्यङ्गत्वात्पृथगुपदिश्यते।

## [4 प्रयोजनम्]

यमर्थमधिकृत्य पुरुषः प्रवर्तते तत्प्रयोजनम्। तद् द्विविधं मुख्यं गौणं च। सुखदुःखे मुख्यं प्रयोजनम्। तत्साधनं तु गौणम्। प्रयोजनमूलत्वाच्च न्यायप्रवृत्तेस्तदपि पृथगुपदिश्यते।

## [5 दृष्टान्तः]

वादिप्रतिवादिनोः साध्यसाधनधर्माधिकरणत्वेन तद्रहितत्वेन वा प्र-

---

**7** *Nyāyasūtra* 1.1.24 (quoted in NM II 540): **यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम्॥**

**11** *Nyāyasūtra* 1.1.25 (quoted in NM II 542): **लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः॥**

---

**4** NM II 522　**7** NM II 540　**11** NM II 543

---

**1 असच्च खपुष्पादि नोपलभ्यते** ] $E_dB_1B_2^{pc}B_3^{pc}G_1L_1R_1V_1$ ; om. $B_2^{ac}$ ; **असच्च खपुष्पादिनो** $B_3^{ac}$　**1 ततो ऽन्य°** ] $E_dB_1B_2$ ; +++ $G_1$ ; **तदन्य°** $B_3L_1R_1V_1$　**1 °त्रानु°** ] $B_1B_2B_3L_1R_1V_1$ ; **°तरे ऽनु°** $E_d$ ; +++ $G_1$　**1 °भ्यमाने** ] $E_dB_1B_2B_3G_1R_1V_1$ ; **°भ्यमानेन** $L_1$　**4 ऽपि** ] $B_1B_3L_1R_1V_1$ ; om. $E_dB_2G_1$　**4 °प्रवृत्त्य°** ] $E_dB_1B_2G_1L_1R_1V_1$ ; **°प्रवृत्त्या°** $B_3$　**7 यमर्थमधिकृत्य** ] $E_dB_1B_2B_3G_1V_1$ ; **यमर्थ अधिकृत्य** $L_1$ ; **यमर्थमुद्दिश्य** $R_1$　**7 प्रवर्तते** ] $E_dB_1B_2G_1L_1R_1V_1$ ; **प्रवर्तैते** $B_3$　**8 च** ] $E_dB_1B_2B_3L_1R_1$ ; om. $G_1V_1$　**8 सुखदुःखे** ] $B_1B_3R_1$ ; **सुखं दुःखं** $E_d$ ; **सुखदुःखं** $B_2G_1L_1V_1$　**8 तु** ] $E_dB_1B_2G_1L_1V_1$ ; **च** $B_3R_1$　**9 °मूलत्वाच्च** ] $B_1B_3L_1R_1$ ; **°मूलत्वान्** $E_dB_2G_1V_1$　**11 °धिकरणत्वेन** ] $E_dB_1B_2G_1L_1R_1V_1$ ; **°धिकारणत्वेन** $B_3$　**11 तद्रहितत्वेन** ] $E_dB_2B_3^{pc}G_1L_1R_1V_1$ ; **तद्रहित्वेन** $B_1B_3^{ac}$　**11 वा** ] $E_dB_1^{pc}B_2B_3G_1L_1R_1V_1$ ; om. $B_1^{ac}$

सिद्धो ऽर्थो दृष्टान्तः। स च न्यायस्य प्रतिबन्धग्रहणस्थानमिति पृथगुपदिश्यते।

## [6 सिद्धान्तः]

### [6.1 सिद्धान्तलक्षणम्]

"अयमेवम्" इति प्रमाणमूलाभ्युपगमविषयीकृतः सामान्यविशेषवानर्थः सिद्धान्तः।

### [6.2 सिद्धान्तविभागः]

स चतुर्विधः—सर्वतन्त्रसिद्धान्तः प्रतितन्त्रसिद्धान्तो ऽधिकरणसिद्धान्तो ऽभ्युपगमसिद्धान्त इति।

#### [6.2.1 सर्वतन्त्रसिद्धान्तः]

सर्वतन्त्राविरुद्धः स्वशास्त्रे प्रक्रियमाणो ऽर्थः सर्वतन्त्रसिद्धान्तः। यथा "प्रमाणं चाक्षुषम्" इति।

---

**5** *Nyāyasūtra* 1.1.26 (quoted in NM II 544): तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः॥
**8** *Nyāyasūtra* 1.1.27 (quoted in NM II 545): सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्॥
**11** *Nyāyasūtra* 1.1.28 (quoted in NM II 545): सर्वतन्त्राविरुद्धस्तन्त्रे ऽधिकृतो ऽर्थः सर्वतन्त्रसिद्धान्तः॥

---

**5** NM II 544 **6** NM II 544.9–10: इदमिति सामान्यनिर्देशः, इत्थमिति विशेषनिर्देशः। **8** NM II 545 **11** NM II 545

---

**1 प्रसिद्धो ऽर्थो** ] $E_dB_1B_2G_1L_1R_1V_1$ ; **प्रसिद्धार्थो** $B_3$ **1 दृष्टान्तः** ] $E_dB_1B_2B_3^{pc}G_1L_1R_1V_1$ ; **ष्टान्तः** $B_3^{ac}$ **5 ॰भ्युपगम॰** ] $B_1B_2B_3G_1L_1^{pc}R_1V_1^{pc}$ ; **॰भ्युपगमः** $E_d$ ; **॰भ्युगम॰** $L_1^{ac}V_1^{ac}$ **5 ॰कृतः** ] $E_dB_1B_2B_3G_1R_1V_1$ ; **॰कृत॰** $L_1$ **8 स** ] $E_dB_2G_1L_1R_1V_1$ ; **स च** $B_1B_3$ **11 स्व॰** ] $E_dB_1B_3G_1L_1R_1V_1$ ; **स्वे** $B_2$ **11 ॰स्त्रे प्रक्रियमाणो** ] $E_dB_1B_3R_1$ ; **॰स्त्रे क्रियमाणो** $B_2G_1V_1$ ; **॰स्त्रक्रियमाणो** $L_1$

### [6.2.2 प्रतितन्त्रसिद्धान्तः]

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः। यथा “परमाणवः पदार्थः” इति। समानतन्त्रे काणादे सिद्धो ऽयमर्थः परतन्त्रे साङ्ख्यादिशास्त्रे ऽसिद्ध इति।

### [6.2.3 अधिकरणसिद्धान्तः]

यस्मिन्नर्थे सिध्यति तदनुयायीन्यर्थान्तराण्यपि सिध्यन्ति, सो ऽधिकरणसिद्धान्तः। यथा “इन्द्रियव्यतिरिक्त आत्मा, दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्” इत्यस्मिन्नर्थे सिध्यति “गुणव्यतिरिक्तो गुणी” “नियतविषयाणीन्द्रियाणि” इत्यादीन्यप्यर्थान्तराणि सिध्यन्ति।

### [6.2.4 अभ्युपगमसिद्धान्तः]

अपरीक्षितः कश्चिदर्थो बुद्ध्यतिशयचिख्यापयिषया प्रौढवादिभिस्त-

---

**2** *Nyāyasūtra* 1.1.29: समानतन्त्रासिद्धः परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः॥
**6** *Nyāyasūtra* 1.1.30 (quoted in NM II 546): यत्सिद्धावन्यप्रकरणसिद्धिः सो ऽधिकरणसिद्धान्तः॥; *Syādvādaratnākara* 973.9–12: यस्मिन्नर्थे सिध्यति तदनुयायीन्यर्थान्तराण्यपि सिध्यन्ति सो ऽधिकरणसिद्धान्तः। यथेन्द्रियव्यतिरिक्त आत्मा दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येकस्मिन्नर्थे सिध्यति गुणव्यतिरिक्तो गुणी नियतविषयाणीन्द्रियाणीत्यादीन्यर्थान्तराण्यपि सिध्यन्ति।
**11** *Nyāyasūtra* 1.1.31 (quoted in NM II 548): अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः॥; *Syādvādaratnākara* 973.15–17: अपरीक्षितो

---

**2** NM II 546 **6** NM II 547 **11** NM II 548

---

**2** परतन्त्रा° ] $E_dB_1^{pc}B_2B_3^{pc}G_1L_1R_1V_1$; परतन्त्र° $B_1^{ac}B_3^{ac}$ **3** परमाणवः ] $E_dB_1B_2B_3L_1R_1$; पारमाणवः $G_1V_1$ **3** पदार्थः ] $E_dB_1B_2$; पदार्था $B_3G_1L_1R_1V_1$ **3** काणादे ] $B_1B_3R_1$; काणादे च $E_dB_2G_1$; काणादेः च $L_1V_1$ **3** परतन्त्रे ] $E_dB_1B_2G_1$; परतन्त्रे च $B_3L_1R_1V_1$ **6** °यीन्यर्था° ] $E_dB_1B_2B_3G_1L_1R_1$; °यीति अर्था° $V_1$ **6** °राण्यपि ] $E_dB_1B_2B_3G_1L_1V_1$; °राणि च $R_1$ **8** °स्पर्शनाभ्या° ] $E_dB_1B_2G_1L_1R_1V_1$; °स्पर्शाभ्याप् $B_3$ **8** गुणी ] $B_1B_2B_3G_1L_1R_1V_1$; गुणो $E_d$ **9** °दीन्यप्य° ] $B_1B_3L_1R_1$; °दीन्य° $E_dB_2G_1V_1$ **9** °न्तराणि ] $B_1B_3R_1$; °न्तराण्यपि $E_dB_2G_1L_1V_1$ **11** °क्षितः ] $B_2^{ac}G_1V_1^{ac}$; °क्षितो ऽपि $E_dB_1B_2^{pc}B_3L_1R_1V_1^{pc}$

थेत्युपगम्यमानो ऽभ्युपगमसिद्धान्तः। यथा "अस्तु द्रव्यं शब्दः, तथाप्यनित्यः" इति।

[6.3 पृथगुपदेशसमर्थनम्]

स चायं चतुर्विधो ऽपि सिद्धान्तो न्यायस्याश्रय इति पृथगुच्यते।

[7 अवयवाः]

[7.1 अवयवलक्षणम्]

साधनीयस्यार्थस्य यावता वाक्येन परस्मै प्रतिपादनं क्रियते, तस्य पञ्च भागाः प्रतिज्ञादयो ऽवयवाः।

[7.2 अवयवविभागः]

प्रतिज्ञा हेतुरुदाहरणमुपनयो निगमनमिति।

[7.2.1 प्रतिज्ञा]

[7.2.1.1 प्रतिज्ञालक्षणम्]

तत्र साध्यधर्मविशिष्टस्य धर्मिणो निर्देशः प्रतिज्ञा। तद्यथा "अनि-

---

ऽपि हि कश्चिदर्थो बुद्ध्यतिशयचिख्यापयिषया प्रौढवादिभिस्तथेत्यभ्युपगम्यमानो ऽभ्युपगमसिद्धान्तः। यथास्तु द्रव्यं शब्दस्तथाप्यनित्य इति।

**10** *Nyāyasūtra* 1.1.32 (quoted in NM II 552): प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः॥

**13** *Nyāyasūtra* 1.1.33 (quoted in NM II 554): साध्यनिर्देशः प्रतिज्ञा॥; *Syādvādaratnākara* 973.19 (Marui [2000:104, n.25]): तत्र साध्यधर्मविशिष्टस्य धर्मिणो निर्देशः प्रतिज्ञा।

---

**4** NM II 550 **7** NM II 550 **13** NM II 554 **13** NM II 555.18: तद्यथा "अनित्यः शब्दः" इति।

---

**1** °त्युपगम्य° ] $B_1B_2B_3G_1$; °त्यभ्युपगम्य° $E_dL_1R_1V_1$ **4** न्यायस्या° ] $E_dB_1B_3G_1L_1R_1V_1$; न्याय्यस्या° $B_2$ **4** °गुच्यते ] $B_1B_3R_1$; °गुपदिश्यते $E_dB_2G_1L_1V_1$ **7** परस्मै ] $E_dB_1B_2B_3G_1L_1V_1$; तस्मै $R_1$ **7** प्रतिपादनं ] $E_dB_2B_3G_1L_1R_1V_1$; प्रतिपादानं $B_1$ **8** भागाः ] $E_dB_2B_3G_1L_1R_1$; भागः $B_1$; भागात् $V_1$ **13** तत्र ] $E_dB_1B_2B_3G_1L_1V_1$; om. $R_1$ **13** तद्यथा ] $B_1B_3R_1$; यथा $E_dB_2G_1L_1V_1$

त्यः शब्दः” इति। एष एव च पक्ष उच्यते।

[7.2.1.2 पक्षाभासः]

पक्षे लक्षिते ऽर्थात्पक्षाभासाः प्रत्यक्षविरुद्धादयः प्रतिक्षिप्ता भवन्ति।

[7.2.1.2.1 विरुद्धः]

[7.2.1.2.1.1 प्रत्यक्षविरुद्धः पक्षः]

तद्यथा “अनुष्णो ऽग्निः” इति प्रत्यक्षविरुद्धः पक्षः।

[7.2.1.2.1.2 अनुमानविरुद्धः पक्षः]

अनुमानविरुद्धो यथा “न चक्षू रूपं गृह्णाति” इत्यनुमानविरुद्धः ।

[7.2.1.2.1.3 शब्दविरुद्धः पक्षः]

शब्दविरुद्धस्तु बहुप्रकारः। “ब्राह्मणेन सुरा पेया” इत्यागमविरुद्धः। “न चन्द्रः शशी” इति लोकप्रसिद्धिविरुद्धः। “नित्यः शब्दः” इति बौद्धस्य स्वसिद्धान्तविरुद्धः। “जननी मे वन्ध्या” “पिता मे बालब्रह्मचारी” इति धर्मिधर्मपदयोरेव विप्रतिषेधात्स्ववचनविरुद्धः।

---

**1** NM II 558　**3** NM II 558　**6** NM II 558　**8** NM II 558　**10** NM II 558

---

**1 एव च** ] $B_1B_2^{pc}B_3G_1L_1R_1$ ; एव $E_dB_2^{ac}$　**1 उच्यते** ] $E_dB_1B_2B_3G_1R_1V_1$ ; इत्युच्यते $L_1$　**3 प्रत्यक्षविरुद्धादयः ··· ऽग्निः” इति** ] $E_dB_1B_2^{pc}B_3G_1L_1V_1$ ; om. $B_2^{ac}$ ; विपक्षविरुद्धादयः प्रतिक्षिप्ता भवन्ति तद्यथा अनुष्णो ग्निरिति $R_1$　**6 प्रत्यक्षविरुद्धः** ] $E_dB_2G_1L_1R_1V_1$ ; प्रत्यक्षविरुद्ध $B_1B_3$　**8 गृह्णाति” इत्यनुमानविरुद्धः** ] $B_1B_2B_3G_1V_1$ ; गृह्णाति $E_d$ ; गृहाति इति अनुमानविरुद्धः $L_1^{ac}$ ; गृहाति इति $L_1^{pc}R_1$　**10 °विरुद्धस्तु** ] $B_1B_3^{ac}R_1^{pc}$ ; °विरुद्धास्तु $E_dB_2B_3^{pc}G_1L_1V_1$ ; °विरुद्धो $R_1^{ac}$　**10 बहुप्रकारः** ] $B_1R_1$ ; बहुप्रकाराः $E_dB_2B_3G_1L_1V_1$　**10 ब्राह्मणेन** ] $E_dB_1B_2B_3^{pc}G_1L_1R_1V_1$ ; ब्रह्मणेन $B_3^{ac}$　**10 सुरा पेया” इत्यागम°** ] $E_dB_1B_2B_3L_1R_1V_1$ ; ++++++ $G_1$　**11 लोकप्रसिद्धि°** ] $E_dB_1^{ac}B_3R_1$ ; लोकप्रसिद्ध° $B_1^{pc}B_2G_1L_1V_1$　**11 नित्यः** ] $E_dB_1B_2B_3G_1R_1V_1$ ; नित्या $L_1$　**13 बाल°** ] $E_dB_1B_2B_3G_1L_1V_1$ ; om. $R_1$　**13 विप्रतिषेधा°** ] $E_dB_2B_3G_1L_1R_1V_1$ ; प्रतिषेधा° $B_1$

[7.2.1.2.1.4 उपमानविरुद्धः पक्षः]

उपमानविरुद्धस्तु “न गवयशब्दवाच्यो ऽयं गोसदृशः पिण्डः” इति।

[7.2.1.2.2 अप्रसिद्धः]

[7.2.1.2.2.1 अप्रसिद्धविशेषणः पक्षः]

अप्रसिद्धविशेषणः “शशशृङ्गविदीर्णेयं भूमिः” इति।

[7.2.1.2.2.2 अप्रसिद्धविशेष्यः पक्षः]

अप्रसिद्धविशेष्यः “शशशृङ्गं तीक्ष्णम्” इति।

[7.2.1.2.2.3 अप्रसिद्धोभयः पक्षः]

अप्रसिद्धोभयस्तु “शशशृङ्गधनुर्धरो वन्ध्यासुतः” इति।

[7.2.1.2.3 साध्यहीनः]

यत्रापि विशेषणविशेष्ययोः प्रमाणान्तरत एव सिद्धिः, तत्रापि साध्यत्वाभावेन हेतुप्रयोगावसराभावात्पक्षाभासतैव। “शीतलं तुहिनम्” “उष्णो ऽग्निः” इति।

---

**2** NM II 558 **6** NM II 558 **8** NM II 558 **10** NM II 558 **12** NM II 559

---

**2** उपमानविरुद्धस्तु ] $E_dB_1^{pc}B_2B_3^{pc}G_1L_1R_1V_1$ ; उपमानस्तु विरुद्ध $B_1^{ac}$ ; उपमानविरुद्ध $B_3^{ac}$ **2** °सदृशः ] $E_dB_1B_2G_1L_1R_1V_1$ ; °सदृश° $B_3$ **6** °यं भूमिः” इति ] $E_dB_1B_2B_3L_1R_1V_1$ ; +++++ $G_1$ **8** °विशेष्यः ] $B_1B_3R_1$ ; °विशेष्यो यथा $E_dB_2L_1V_1$ ; °विशेषो यथा $G_1$ **8** तीक्ष्णम्” इति ] $E_dB_1^{pc}B_2G_1L_1R_1V_1$ ; तीक्ष्ण इति $B_1^{ac}B_3$ **10** °भयस्तु ] $B_1$ ; °भयं यथा $E_dG_1L_1V_1$ ; °भयो यथा $B_2$ ; °भयः $B_3R_1$ **10** °धनुर्धरो ] $B_1B_3R_1$ ; °धनुर्धरो ऽयम् $E_dB_2G_1L_1V_1$ **10** वन्ध्यासु° ] $E_dB_1B_2B_3L_1R_1V_1$ ; वन्ध्यस्सु° $G_1$ **12** प्रमाणा° ] $E_dB_1B_2B_3G_1^{pc}L_1R_1V_1$ ; प्रमाना° $G_1^{ac}$ **12** °रत एव ] $B_1B_2B_3G_1L_1R_1V_1$ ; °र एव $E_d$ **13** हेतुप्रयोगा° ] $B_1B_2^{pc}B_3L_1R_1V_1$ ; प्रयोगा° $E_dB_2^{ac}G_1$ **13** °वसरा° ] $E_dB_1B_2^{pc}B_3G_1L_1R_1V_1$ ; °वरा° $B_2^{ac}$ **13** °भासतैव ] $E_dB_2B_3G_1L_1R_1V_1$ ; °भासातैव $B_1$ **14** शीतलं तुहिनम्” “उष्णो ऽग्निः” इति ] $B_1B_3R_1$ ; तुहिनं शीतलमग्निरुष्ण इति $E_dB_2G_1L_1V_1$

[7.2.1.3 सूत्रसमर्थनम्]

ये चैते पक्षदोषा वक्ष्यमाणाश्च दृष्टान्तदोषाः, ते वस्तुस्थित्या हेतुदोषा एव। न हि पक्षदृष्टान्तमात्रप्रतिष्ठो वादो भवति। अत एव सूत्रकृता हेत्वाभासा एव शास्त्रे लक्षिताः, न पक्षाभासादय इति।

[7.2.2 हेतुः]

[7.2.2.1 हेतुलक्षणम्]

लिङ्गवचनं हेतुः। लिङ्गं व्याख्यातम्। तस्य विशिष्टविभक्त्यन्तं वचनं हेतुरित्युच्यते। यथा “कृतकत्वात्” इत्यादि।

[7.2.2.2 हेतुविभागः]

स च द्विविधः, उदाहरणसाधर्म्येणोदाहरणवैधर्म्येण च।

---

**2 वक्ष्यमाणाश्च** ] See sections 7.2.3.3.1–2.
**7** *Syādvādaratnākara* 973.20 (Marui [2000:104, n.25]): लिङ्गवचनं हेतुः। यथा कृतकत्वादिति।
**7 व्याख्यातम्** ] See section 1.3.2.2.
**10** *Nyāyasūtra* 1.1.34 (quoted in NM II 560): उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः॥; *Nyāyasūtra* 1.1.35 (quoted in NM II 564): तथा वैधर्म्यात्॥

---

**2** NM II 559　**7** NM II 559　**10** NM II 560

---

**2 ये चैते पक्षदोषा** ] $E_dB_1B_2B_3G_1R_1V_1$; पंचैते पदोदोषाः $L_1$　**2 वक्ष्यमाणाश्च** ] $B_1B_3R_1$; ये च वक्ष्यमाण° $E_dB_2G_1L_1^{pc}V_1$; ये च वक्ष्यमा° $L_1^{ac}$　**2 वस्तुस्थित्या** ] $E_dB_1B_2^{pc}B_3G_1R_1V_1^{pc}$; वस्तुवृत्त्या $B_2^{ac}L_1V_1^{ac}$　**3 न हि पक्षदृष्टान्त°** ] $E_dB_1B_2B_3L_1R_1V_1$; ++++++++ $G_1$　**3 °मात्र°** ] $E_dB_1B_2B_3G_1L_1R_1$; °मात्रो° $V_1$　**3 वादो** ] $E_dB_1B_2G_1L_1R_1V_1$; वादोषो $B_3$　**3 अत एव** ] $E_dB_1B_2B_3G_1L_1R_1$; अत एत $V_1$　**4 °भासादय** ] $B_1B_2B_3G_1L_1R_1V_1$; °भासा $E_d$　**8 °रित्युच्यते** ] $E_dB_1B_2^{pc}B_3G_1L_1R_1V_1$; °रिच्यते $B_2^{ac}$　**8 °त्वात्” इत्यादि** ] $E_dB_1B_2B_3G_1R_1$; °त्वादिति $L_1V_1$　**10 स च** ] $E_dB_1B_3G_1L_1R_1V_1$; स $B_2$　**10 °णवैधर्म्येण च** ] $E_dB_2B_3^{pc}G_1L_1V_1$; °णवैधर्म्येण $B_1$; °णवैधर्मेण $B_3^{ac}$; °वैधर्म्येण च $R_1$

### [7.2.2.2.1 अन्वयव्यतिरेकवान्]

अन्वयव्यतिरेकवान् प्रथमः।

### [7.2.2.2.2 केवलव्यतिरेकी]

केवलव्यतिरेकी द्वितीयः।

### [7.2.2.2.3 केवलान्वयी नास्ति]

केवलान्वयी हेतुर्नास्त्येव, अपञ्चलक्षणस्य हेतुत्वाभावात्।

### [7.2.2.2.4 अन्वयव्यतिरेकिमूलः केवलव्यतिरेकी]

केवलव्यतिरेकी तु क्वचिद्विषये ऽन्वयव्यतिरेकिमूलः प्रवर्तते, नात्यन्तमन्वयबाह्यः। यथात्मनीच्छादिगतं कार्यत्वं सविशेषणम्। तत्र ह्यन्वयव्यतिरेकिणा कार्यत्वमात्रेणाश्रयमात्रमनुमीयते “इच्छादि क्वचिदाश्रितं कार्यत्वाद् घटवत्” इति। ततः स एव कार्यत्वं हेतुः सविशेषण आत्मसिद्धौ प्रयुज्यते “देहादिविलक्षणाश्रयाश्रित-

---

**8** Cf. Kataoka [2009b:294–297]

---

**2** NM II 561 **6** NM II 561 **8** NM II 567 **8** NM I 503.7–8: अन्ये त्वन्वयव्यतिरेकिहेतुमूलकेवलव्यतिरेकिबलेन विशेषसिद्धिमभिदधति।; NM II 278.13: आश्रयमात्रप्रतीतौ चायमन्वयव्यतिरेकवानेव हेतुर्भवति।

---

**2 °वान् प्रथमः** ] $E_dB_1B_2B_3L_1R_1V_1$ ; ++++++ $G_1$ **4 केवल°** ] $E_dB_1B_2B_3L_1R_1V_1$ ; ++ल° $G_1$ **6 केवलान्वयी** ] $E_dB_1B_2G_1L_1V_1$ ; केवलान्वयी तु $B_3R_1$ **6 अपञ्च°** ] $E_dB_1^{pc}B_2B_3G_1L_1R_1V_1$ ; पञ्च° $B_1^{ac}$ **8 क्वचि°** ] $E_dB_1B_2B_3G_1R_1V_1$ ; तत्क्वचि° $L_1$ **8 °रेकिमूलः** ] $B_1^{pc}L_1$ ; °रेकमूलः $E_dB_2B_3G_1R_1V_1$ ; °मूलः $B_1^{ac}$ **9 सविशेषणम्** ] $E_dB_1^{pc}B_2B_3G_1L_1R_1V_1$ ; सविशेषं $B_1^{ac}$ **10 कार्यत्व°** ] $B_1B_2B_3G_1L_1R_1V_1$ ; कार्य° $E_d$ **10 °मात्रमनुमीयते** ] $B_1B_2B_3G_1L_1R_1V_1$ ; °मात्रेणानुमीयते $E_d$ **11 क्वचिदाश्रितं** ] $E_dB_2B_3G_1L_1R_1V_1$ ; क्वचिदाश्रिते $B_1$ **11 घट°** ] $E_dB_1B_2^{ac}B_3G_1L_1R_1V_1$ ; घटादि° $B_2^{pc}$ **11 ततः** ] $E_dB_1B_2B_3L_1R_1V_1$ ; ++ $G_1$ **12 सविशेषण आत्म°** ] $E_dB_2B_3G_1L_1^{pc}R_1V_1$ ; सविशेषणात्म° $B_1$ ; सविषण $L_1^{ac}$ ; आत्म° $L_1^{ac}$ **12 °विलक्षणाश्रया°** ] $E_dB_2B_3G_1L_1R_1$ ; °लक्षणाश्रिया° $B_1^{ac}$ ; °विलक्षणाश्रिया° $B_1^{pc}V_1$

मिच्छादि, देहादिषु बाधकप्रमाणोपपत्तौ सत्यां कार्यत्वात्। यत्र शरीरादिव्यतिरिक्ताश्रयाश्रितत्वं नास्ति, तत्र सविशेषणं कार्यत्वं नास्ति, यथा घटादौ शरीरत्वजातौ वा” इति।

[7.2.3 उदाहरणम्]

[7.2.3.1 उदाहरणलक्षणम्]

दृष्टान्तवचनमुदाहरणम्।

[7.2.3.2 दृष्टान्तविभागः]

दृष्टान्तो द्विविधः। साधर्म्येण वैधर्म्येण च।

[7.2.3.2.1 साधर्म्यदृष्टान्तः]

यत्र प्रयोज्यप्रयोजकभावेन साध्यसाधनधर्मयोरस्तित्वं ख्याप्यते, स साधर्म्यदृष्टान्तः। तस्य व्याप्यव्यापकभावगर्भं वचनमुदाहरणम्। यथा “यद्यत् कृतकं तत्तदनित्यं दृष्टं यथा घटः” इति।

---

**6** *Nyāyasūtra* 1.1.36 (quoted in NM II 569): साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्॥; *Syādvādaratnākara* 973.20–21 (Marui [2000:104, n.25]): दृष्टान्तवचनमुदाहरणं।
**8** *Syādvādaratnākara* 973.21: दृष्टान्तो द्विविधः। साधर्म्येण वैधर्म्येण च।
**8** *Nyāyasūtra* 1.1.37 (quoted in NM II 571): तद्विपर्ययाद्वा विपरीतम्॥
**10** *Syādvādaratnākara* 973.21–974.1: यत्र प्रयोज्यप्रयोजकभावेन साध्यसाधनधर्मयोरस्तित्वं ख्याप्यते स साधर्म्यदृष्टान्तः। तस्य व्याप्यव्यापकभावगर्भं वचनमुदाहरणम्। यद्यत्कृतकं तत्तदनित्यं दृष्टम्। यथा घट इति।

---

**6** NM II 570　**8** NM II 571　**10** NM II 569

---

**2 कार्यत्वं** ] $B_1B_3R_1$ ; कार्यत्वमपि $E_dB_2G_1L_1V_1$　**3 शरीरत्वजा°** ] $E_dB_1B_2B_3L_1R_1V_1$ ; श++++ $G_1$　**3 इति** ] $E_dB_2G_1L_1R_1V_1$ ; om. $B_1B_3$　**8 द्विविधः** ] $E_dB_1B_2B_3G_1L_1^{pc}R_1V_1$ ; द्विधः $L_1^{ac}$　**8 वैधर्म्येण** ] $E_dB_1B_2G_1L_1R_1V_1$ ; वाधर्म्येण $B_3$　**10 °साधनधर्मयोर°** ] $B_1B_3$ ; °साधनयोर्धर्मयोर° $E_dB_2G_1L_1V_1$ ; °साधनयोर° $R_1$　**12 यथा** ] $B_1B_3L_1R_1V_1$ ; om. $E_dB_2G_1$　**12 यद्यत्** ] $E_dB_1B_2B_3G_1L_1R_1$ ; यत् $V_1$

[7.2.3.2.2 वैधर्म्यदृष्टान्तः]

यत्र साध्याभावप्रयुक्तो हेत्वभावः ख्याप्यते, स वैधर्म्यदृष्टान्तः। तस्य तथाविधमेव वचनमुदाहरणम्। "यत्रानित्यत्वं नास्ति तत्र कृतकत्वमपि नास्ति यथाकाशः" इति।

[7.2.3.3 दृष्टान्ताभासः]

अर्थाच्च दृष्टान्ताभासाः प्रतिक्षिप्ता वेदितव्याः।

[7.2.3.3.1 साधर्म्यदृष्टान्ताभासः]

साधर्म्यदृष्टान्ताभासे त्रयो ऽर्थदोषाः—साध्यविकलः साधनविकल उभयविकलः। द्वौ वचनदोषौ—अनन्वयो विपरीतान्वय इति।

[7.2.3.3.1.1 अर्थदोषाः]

[7.2.3.3.1.1.1 साध्यविकलः]

"नित्यः शब्दो ऽमूर्तत्वात्, यदमूर्तं तन्नित्यं दृष्टं यथा बुद्धिः" इति साध्यविकलः।

---

**2** *Syādvādaratnākara* 974.1–4: यत्र साध्याभावः ख्याप्यते स वैधर्म्यदृष्टान्तः। तस्य व्याप्यव्यापकभावगर्भं तथाभूतमेव वचनमुदाहरणम्। यत्रानित्यत्वं नास्ति तत्र कृतकत्वमपि नास्ति यथाकाश इति।

---

**2** NM II 571 **6** NM II 573 **8** NM II 573 **9** NM II 573 **12** NM II 573

---

**2** साध्याभाव° ] $E_dB_2G_1L_1R_1V_1$ ; साध्याभावो $B_1$ ; साध्याभावे $B_3$ **2** ख्याप्यते ] $E_dB_1B_2^{ac}B_3G_1L_1V_1$ ; व्याप्यते $B_2^{pc}R_1$ **3** तथाविधमेव ] $B_1B_3$ ; तथाभूतमेव $E_dB_2G_1L_1R_1V_1$ **3** यत्रा° ] $E_dB_1^{pc}B_2^{pc}B_3^{pc}G_1L_1R_1V_1$ ; यत्र $B_1^{ac}B_2^{ac}B_3^{ac}$ **4** यथाकाशः" इति ] $E_dB_1B_2B_3G_1L_1^{pc}R_1V_1$ ; यथा आश इति $L_1^{ac}$ **6** °भासाः ] $E_dB_1B_2B_3^{pc}G_1L_1R_1V_1$ ; °भासः $B_3^{ac}$ **9** °भयविकलः ] $B_1B_3$ ; °भयविकलश्चेति $E_dB_2G_1L_1V_1$ ; °भयविकल इति $R_1$ **9** विपरीतान्वय इति ] $B_1B_3R_1$ ; विपरीतश्चेति $E_dB_2^{ac}G_1$ ; विपरीतान्वयश्चेति $B_2^{pc}L_1^{pc}V_1$ ; विपरीताश्चेति $L_1^{ac}$ **12** शब्दो ] $E_dB_1B_2B_3G_1L_1R_1$ ; शब्दा $V_1$ **12** बुद्धिः" इति ] $E_dB_1B_2B_3L_1R_1V_1$ ; ++++ $G_1$

[7.2.3.3.1.1.2 साधनविकलः]

“परमाणुः” इति साधनविकलः।

[7.2.3.3.1.1.3 उभयविकलः]

“घटः” इत्युभयविकल इत्यर्थदोषाः।

[7.2.3.3.1.2 वचनदोषौ]

[7.2.3.3.1.2.1 अनन्वयः]

वचनदोषौ तु “यदमूर्तं तन्नित्यं यथाकाशम्” इति वक्तव्ये “आकाशे नित्यत्वामूर्तत्वे स्तः” इत्यनन्वयः।

[7.2.3.3.1.2.2 विपरीतान्वयः]

“यन्नित्यं तदमूर्तम्” इति विपरीतान्वयः।

[7.2.3.3.2 वैधर्म्यदृष्टान्ताभासः]

वैधर्म्यदृष्टान्ते ऽपि त्रयो ऽर्थदोषाः—साध्याव्यावृत्तः साधनाव्यावृत्त उभयाव्यावृत्तः। द्वौ वचनदोषौ—अव्यतिरेको विपरीतव्यतिरेक इति।

---

**2** NM II 573　**4** NM II 573　**7** NM II 573　**10** NM II 574　**12** NM II 574

---

**2** परमाणुरिति ] $B_1B_3R_1$ ; यथा परमाणुरिति $E_dB_2G_1L_1V_1$　**4** घटः ] $B_1B_3R_1$ ; यथा घट $E_dB_2G_1L_1V_1$　**4** °र्थदोषाः ] $E_dB_1B_2B_3G_1L_1V_1$ ; °र्थदोषः $R_1$　**7** तन्नित्यं ] $E_dB_1B_2G_1L_1R_1V_1$ ; तदनित्यं $B_3$　**8** इत्यनन्वयः ] $E_dB_2B_3G_1L_1R_1V_1$ ; इत्यन्वन्वयः $B_1$　**12** ऽपि ] $E_dB_1B_3G_1L_1R_1V_1$ ; om. $B_2$　**12** ऽर्थदोषाः ] $B_1B_3L_1R_1V_1$ ; दोषाः $E_dB_2G_1$　**13** साधनाव्यावृत्त ] $E_dB_2B_3^{pc}G_1L_1R_1V_1$ ; साधनव्यावृत्तः $B_1B_3^{ac}$　**13** उभयाव्यावृत्तः ] $B_1B_3^{pc}$ ; उभयाव्यावृत्तश्चेति $E_dB_2G_1L_1V_1$ ; उभयव्यावृत्तः $B_3^{ac}$ ; उभयाव्यावृत्त इति $R_1$　**13** वचन° ] $E_dB_1B_2B_3G_1L_1^{pc}R_1V_1$ ; वच° $L_1^{ac}$　**13** अव्यतिरेको ] $E_dB_1B_2B_3G_1R_1V_1$ ; अव्यतिरेकी $L_1$　**14** °व्यतिरेक इति ] $B_1B_2B_3G_1R_1V_1$ ; °व्यतिरेकश्चेति $E_d$ ; °व्यतिरेकी इति $L_1$

[7.2.3.3.2.1 अर्थदोषाः]

[7.2.3.3.2.1.1 साध्याव्यावृत्तः]

"नित्यः शब्दो ऽमूर्तत्वात्" इत्यत्रैव हेतौ "यत्र नित्यत्वं नास्ति तत्रामूर्तत्वमपि नास्ति यथा परमाणुषु" इति साध्याव्यावृत्तः।

[7.2.3.3.2.1.2 साधनाव्यावृत्तः]

"यथा बुद्धौ" इति साधनाव्यावृत्तः।

[7.2.3.3.2.1.3 उभयाव्यावृत्तः]

"यथाकाशे" इत्युभयाव्यावृत्त इत्यर्थदोषाः।

[7.2.3.3.2.2 वचनदोषौ]

[7.2.3.3.2.2.1 अव्यतिरेकः]

वचनदोषौ तु "यत्र नित्यत्वं नास्ति तत्रामूर्तत्वमपि नास्ति यथा घटे" इति वक्तव्ये "घटे नित्यत्वामूर्तत्वे न स्तः" इत्यव्यतिरेकः।

---

**3** NM II 574 **6** NM II 574 **8** NM II 574 **11** NM II 574

---

**3** शब्दो ऽमूर्त॰ ] $E_dB_2G_1L_1R_1V_1$ ; शब्द रमूर्त॰ $B_1$ ; शब्देरमूर्त॰ $B_3$ **3** ॰त्यत्रैव ] $E_dB_1B_2B_3G_1L_1V_1$ ; ॰त्यत्र $R_1$ **4** तत्रामूर्त॰ ] $B_1B_2^{pc}B_3G_1L_1R_1V_1$ ; तत्र मूर्त॰ $E_dB_2^{ac}$ **4** यथा परमाणुषु" इति ⋯ यथा घटे" इति ] $E_dB_1B_2B_3G_1L_1V_1$ ; यथा घटे इति $R_1$(eyeskip) **6** साधनाव्यावृत्तः ] $E_dB_1^{pc}B_2B_3G_1L_1V_1$ ; साधनव्यावृत्तः $B_1^{ac}$ **8** ॰शे इत्युभ॰ ] $E_dB_1B_2B_3G_1V_1$ ; ॰शेत्युभ॰ $L_1$ **8** इत्यर्थदोषाः ] $E_dB_2G_1L_1V_1^{pc}$ ; इत्यर्थदोषः $B_1B_3$ ; इर्थदोषाः $V_1^{ac}$ **12** ॰त्वामूर्तत्वे ] $E_dB_1B_2B_3G_1R_1V_1$ ; ॰त्वमूर्तत्वे $L_1$ **12** इत्यव्यतिरेकः ] $E_dB_1B_2G_1L_1R_1V_1$ ; इति व्यतिरेकः $B_3$

### [7.2.3.3.2.2.2 विपरीतव्यतिरेकः]

साधनाभावे साध्याभावकथनं विपरीतव्यतिरेकः। को ऽयं दोष इति चेत्। कथं न दोषः। हेतोः प्रयोजकत्वमेवोक्तं न स्यात्। ततश्च "यत्र धूमो नास्ति तत्राग्निर्नास्ति" इति कथ्यमाने तदनिर्वाहाद्धूमस्य हेतुत्वं हीयते। तस्मात्साध्याभावे हेत्वभावो वक्तव्यः "यत्राग्निर्नास्ति तत्र धूमो नास्ति" इति।

### [7.2.4 उपनयः]

साधर्म्यवैधर्म्योदाहरणानुसारेण "तथा" इति "न तथा" इति वा

---

**8** *Nyāyasūtra* 1.1.38 (quoted in NM II 574): उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः॥

**8 साधर्म्यवैधर्म्यो° ··· न तथाकृतकः शब्दः" इत्युपनयः]** *Syādvādaratnākara* 974.4–8 (Marui [2000:104, n.25]): साधर्म्यवैधर्म्योदाहरणानुसारेण तथेति न तथेति वा साध्यधर्मिणि हेतोरुपसंहार उपनयः। यत्कृतकत्वं तदनित्यं दृष्टं यथा

---

**2** NM II 574　**8** NM II 574

---

**2 साधनाभावे साध्याभावकथनं विपरीतव्यतिरेकः]** $E_dB_1^{pc}B_2^{ac}G_1$; यथा यत्र नित्यत्वं नास्ति तत्रामूर्तत्वमपि नास्तीति वक्तव्ये यत्रामूर्तत्वं नास्ति तत्र नित्यत्वमपि नास्तीति विपरीतव्यतिरेकः $B_1^{ac}$; साधनाभाव्ये साध्याभावकथनं विपरीतव्यतिरेकः यथा यत्र नित्यत्वं नास्ति तत्रामूर्त्तत्वमपि नास्तीति साधनाभावे साध्याभावकथनं विपरीतव्यतिरेकः वक्तव्ये यत्रामूर्त्तत्वमपि नास्तीति विपरीतव्यतिरेकः $B_3$; साधनाभावे साध्याभावकथनं विपरीतव्यतिरेकः यथा यत्र नित्यत्वं नास्ति तत्रामूर्तत्वमपि नास्तीति वक्तव्ये यत्रामूर्तत्वं नास्ति तत्र नित्यत्वमपि नास्तीति विपरीतव्यतिरेकः $B_2^{pc}L_1R_1V_1$　**2 विपरीत°]** $E_dB_1B_2B_3G_1^{pc}L_1R_1V_1$; विरीत° $G_1^{ac}$　**3 प्रयोजक°]** $E_dB_1B_3L_1R_1V_1$; प्रयोजनक° $B_2G_1$　**3 ततश्च]** $E_dB_1B_2B_3G_1L_1V_1$; तथा च $R_1$　**4 तत्राग्निर्ना°]** $B_1B_3$; तत्राग्निरपि ना° $E_dB_2G_1L_1R_1V_1$　**5 हेतुत्वं]** $B_1B_2B_3G_1L_1R_1V_1$; हेतुतुवन्न $E_d$　**5 हीयते]** $E_dB_1B_2G_1L_1V_1$; हीयेते $B_3$; हीयेत $R_1$　**5 °ध्याभावे]** $B_1B_3$; °ध्याभाव° $E_d$; °ध्याभाव एव $B_2G_1L_1R_1$; °ध्यभाव एव $V_1$　**5 हेत्वभावो]** $E_dB_2B_3G_1R_1$; हेत्वाभावो $B_1$; हेतुत्वाभावो $L_1V_1$　**6 धूमो]** $B_1B_2^{ac}B_3$; धूमो ऽपि $E_dB_2^{pc}G_1L_1R_1V_1$　**8 साधर्म्य°]** $E_dB_1B_2G_1L_1R_1V_1$; साध° $B_3$　**8 न तथा" इति वा]** $E_dB_2G_1L_1R_1V_1$; न तथेति $B_1B_3$

साध्यधर्मिणि हेतोरुपसंहार उपनयः। “यत्कृतकं तदनित्यं दृष्टं यथा घटः” इति साधर्म्योदाहरणे “तथा च कृतकः शब्दः” इत्युपनयः। “यदनित्यं न भवति तत्कृतकमपि न भवति यथाकाशम्” इति वैधर्म्योदाहरणे “न तथाकृतकः शब्दः” इत्युपनयः। उपनयमन्तरेण दृष्टान्ते दर्शितशक्तिर्हेतुः साध्यधर्मिणि न योजितः स्यात्। हेतुवचनेन हि तत्र धर्ममात्रं निर्दिष्टमिति।

उपनयाभासस्तु वचनदोषादेव भवति। “तथा” इति स्थाने “न तथा” इति यद्वचनम्, “न तथा” इति स्थाने “तथा” इति, स उपनयाभासः।

---

घट इति साधर्म्योदाहरणे। तथा च कृतकः शब्द इत्युपनयः। यदनित्यं न भवति तत्कृतकमपि न भवति यथाकाशमिति वैधर्म्योदाहरणे। न च तथाकृतकः शब्द इत्युपनयः।

---

**5** NM II 578

---

**1 यत्कृतकं** ] $B_1B_2B_3G_1L_1R_1V_1$ ; **यत्कृतकन्त** $E_d$   **2 साधर्म्योदाहरणे** ] $E_dB_1B_2G_1L_1R_1V_1$ ; **साधर्म्येदाहारणे** $B_3^{ac}$ ; **साधर्म्योदाहारणे** $B_3^{pc}$   **3 यदनित्यं न भवति तत्कृतकमपि न भवति** ] $E_dB_1B_2B_3G_1L_1^{pc}R_1V_1$ ; **यदनित्यं न भवति** $L_1^{ac}$   **3 यथाकाशम्** ] $E_dB_1B_2B_3G_1L_1^{pc}R_1V_1$ ; **यथाशम्** $L_1^{ac}$   **4 वैधर्म्योदाहरणे** ] $E_dB_1B_2B_3G_1L_1V_1$ ; **वैधर्म्योदाहरणानुसारेण तथेति न तथेति वा साध्यधर्मिणि हेतोरुपसंहार उपनयः यत्कृतकं तदनित्यं दृष्टं यथा घट इति साधर्म्योदाहरणे तथा च कृतकः शब्द इत्युपनयः यदनित्यं न भवति तत्कृतकमपि न भवति यथाकाशमिति वैधर्म्योदाहरणे** $R_1$   **4 न** ] $B_1B_3R_1$ ; **न च** $E_dG_1$ ; **च** $B_2$ ; **च न** $L_1V_1$   **5 दृष्टान्ते** ] $E_dB_1B_2G_1$ ; **दृष्टान्तेन** $B_3L_1R_1V_1$   **5 °तुः साध्यधर्मिणि** ] $B_1R_1V_1$ ; **°तुर्धर्मिणि** $E_dG_1L_1$ ; **°तुधर्मिणि** $B_2$ ; **°तुः साध्यधर्मणि** $B_3$   **6 धर्ममात्रं** ] $B_1B_2^{pc}B_3R_1V_1^{pc}$ ; **धर्मवचनं** $E_dB_2^{ac}G_1L_1V_1^{ac}$   **7 भवति** ] $B_1B_2B_3G_1L_1R_1V_1$ ; om. $E_d$   **7 तथा” इति** ] $B_1B_2B_3G_1L_1R_1V_1$ ; **तथेपि** $E_d$   **8 यद्वचनम्** ] $B_1B_3R_1$ ; om. $E_dB_2G_1L_1V_1$   **8 न तथा” इति स्थाने** ] $B_1B_3R_1$ ; **न तथेति स्थाने वा** $E_dB_2G_1L_1V_1$   **9 स उपनयाभासः** ] $B_1B_3R_1$ ; **वचनमुपनयाभासः** $E_dB_2G_1L_1V_1$

## [7.2.5 निगमनम्]

द्विविधे हेतौ द्विविधे दृष्टान्ते द्विविधे चोपनये तुल्यमेव हेत्वपदेशेन पुनः साध्योपसंहरणं निगमनम्। यथा "तस्मात्कृतकत्वादनित्यः शब्दः" इति। निगमनाभासस्तु प्रमादजं विपरीतोपसंहरणं वेदितव्यः।

## [7.3 अवयवक्रमः]

त इमे प्रतिज्ञादयो निगमनान्ताः पञ्चावयवाः स्वप्रतिपत्तिवत्परप्रतिपत्तिमुत्पादयितुमिच्छता यथानिर्दिष्टक्रमकाः प्रयोक्तव्याः। एतदेव साधनवाक्यं परार्थानुमानमाचक्षते। सो ऽयं परमो न्याय इति पृथगुपदिश्यते।

---

**2** *Nyāyasūtra* 1.1.39 (quoted in NM II 579): हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनम्॥

**2** *Syādvādaratnākara* 974.8–10 (Marui [2000:104, n.25]): हेत्वपदेशेन पुनः साध्यधर्मोपसंहरणं निगमनम्। तस्मात्कृतकत्वादनित्यः शब्द इति।

---

**2** NM II 579　**7** NM II 581

---

**2** ॰तौ द्विविधे ] $B_1B_3R_1^{pc}$; ॰तौ द्विविधे च $E_dB_2G_1L_1$; ॰तौ द्विविधो $R_1^{ac}$; ॰तौ च $V_1$　**2** दृष्टान्ते ] $E_dB_1B_2B_3G_1L_1R_1^{pc}V_1$; दृष्टांतो $R_1^{ac}$　**2** हेत्वपदेशेन ] $E_dB_1B_2G_1L_1R_1V_1$; हेत्वपदेशनं $B_3$　**3** साध्योप॰ ] $B_1R_1$; साधर्म्योप॰ $E_d$; साध्यधर्मोप॰ $B_2L_1V_1$; स्साध्योप॰ $B_3$; साद्यधर्मो+ $G_1$　**3** ॰संहरणं ] $B_1B_2B_3L_1R_1V_1$; ॰संहरणान् $E_d$; +++णं $G_1$　**3** यथा ··· वेदितव्यः ] $B_1B_2B_3G_1L_1R_1V_1$; om. $E_d$　**4** इति ] $B_1B_2B_3L_1R_1V_1$; इत्य $G_1$　**4** प्रमादजं ] $B_1B_2G_1L_1R_1V_1$; प्रमादज $B_3$　**4** ॰तोपसंहरणं ] $B_2G_1L_1R_1V_1$; ॰तोपसंहारणं $B_1$; ॰तोपसंहारेण $B_3$　**5** वेदितव्यः ] $B_1B_2B_3L_1$; वेदितव्यम् $G_1R_1V_1$　**7** निगमनान्ताः ] $E_dB_2G_1L_1R_1V_1$; निगमान्ताः $B_1B_3$　**8** ॰मुत्पादयितु॰ ] $E_dB_1B_2^{pc}B_3G_1R_1$; ॰म्पादातु॰ $B_2^{ac}L_1V_1$　**8** ॰मिच्छता ] $E_dB_1B_2^{pc}B_3G_1R_1$; ॰मिच्छति $B_2^{ac}$; ॰मिच्छतः $L_1V_1$　**8** यथानिर्दिष्ट॰ ] $E_dB_1B_2^{pc}B_3G_1R_1$; निर्दिष्ट॰ $B_2^{ac}L_1V_1$　**8** ॰क्रमकाः ] $E_dB_1B_2B_3G_1R_1$; ॰क्रमुकाः $L_1V_1$　**8** प्रयोक्तव्याः ] $E_dB_2B_3^{pc}G_1L_1R_1V_1$; प्रयोक्तव्यः $B_1B_3^{ac}$　**9** परार्था॰ ] $E_dB_2G_1L_1V_1$; परार्थम॰ $B_1B_3R_1$　**10** पृथगुपदिश्यते ] $B_1B_3$; पृथगुच्यते $E_dB_2G_1L_1R_1V_1$

तत्र साधर्म्येण प्रयुज्यमानं तावदीदृशं साधनवाक्यं भवति। "अनित्यः शब्दः, कृतकत्वात्, यत्कृतकं तदनित्यं दृष्टं यथा घटः, तथा च कृतकः शब्दः, तस्मात्कृतकत्वादनित्यः" इति।

वैधर्म्येण तु "अनित्यः शब्दः, कृतकत्वात्, यदनित्यं न भवति तदकृतकं दृष्टं यथाकाशमिति, न च तथाकृतकः शब्दः, तस्मात्कृतकत्वादनित्यः" इति। स्वप्रतिपत्तौ चैवमवगमात्क्रमो ऽयमाश्रयणीयः।

[8 तर्कः]

अविज्ञाततत्त्वे धर्मिण्येकतरपक्षानुकूलार्थदर्शनेन तस्मिन्संभावनाप्र-

---

**9** *Nyāyasūtra* 1.1.40 (quoted in NM II 584): अविज्ञाततत्त्वे ऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥; *Syādvādaratnākara* 974.10–17 (Marui [2000:104, n.26]): अविज्ञाततत्त्वे धर्मिण्येकतरपक्षानुकूलार्थदर्शनेन तस्मिन्संभावनाप्रत्यय ऊहस्तर्कः। यथा चाह केलिप्रदेशादावूर्ध्वत्वदर्शनात्पुरुषेणानेन भवितव्यमिति संभावनाप्रत्ययः। न चायं संशयो ऽश्ववाहनप्रदेशे पुरुषवत्स्थाणोरसंभाव्यत्वेन समकक्षतया स्थाणुपुरुषयोरनुल्लेखात्। न च पुरुषनिर्णयो ऽयं रात्रावपि स्थाणुखननसंभावनया। तत्पक्षस्य सर्वात्मनानपनोदात्। पुरुषनिश्चयहेतूनां च शिरःपाण्यादिविशेषाणामप्रतिभासात्।

---

**9** NM II 584

---

**2** यत्कृतकं तदनित्यं ] $E_dB_1B_2B_3L_1V_1$ ; यत्कृतकमनित्यं $G_1$ ; यन्नित्यं तत्कृतकं $R_1$ **3** तथा च ] $E_dB_2G_1L_1V_1$ ; तथा $B_1B_3R_1$ **3** °दनित्यः" इति ] $B_2^{ac}G_1L_1V_1$ ; °दनित्यमिति $E_d$ ; °दनित्यः शब्द इति $B_1B_3R_1$ ; °दनित्य शब्द इति $B_2^{pc}$ **4** वैधर्म्येण ] $E_dB_1B_2B_3G_1L_1R_1V_1^{pc}$ ; वैधर्म्ये $V_1^{ac}$ **5** तदकृतकं ] $B_1B_3R_1$ ; तत्कृतकमपि $E_dB_2G_1L_1V_1$ **5** दृष्टं ] $B_1B_3R_1$ ; न भवति दृष्टं $E_dL_1V_1$ ; न भवति $B_2$ ; न ++++ष्टं $G_1$ **5** °काशमिति ] $E_dB_1B_3$ ; °काशं $B_2G_1L_1R_1V_1$ **5** न च ] $E_dB_1B_2^{pc}B_3G_1L_1R_1V_1$ ; om. $B_2^{ac}$ **6** °दनित्यः" इति ] $B_1B_3R_1$ ; °दनित्यः शब्द इति $E_dB_2G_1L_1V_1$ **7** ऽयमाश्रयणीयः ] $B_1B_2^{pc}B_3$ ; ऽप्याक्रमणीयः $E_dB_2^{ac}G_1L_1V_1^{ac}$ ; प्ययमाश्रयणीयः $R_1$ ; ऽप्याश्रयणीयः $V_1^{pc}$ **9** अविज्ञाततत्त्वे ] $E_dB_1B_2B_3R_1V_1$ ; अविज्ञातत्वे $G_1L_1$ **9** °दर्शनेन ] $E_dB_1B_2^{pc}B_3G_1L_1R_1V_1$ ; °दर्शने $B_2^{ac}$

त्ययरूप ऊहस्तर्क उच्यते। यथा वाहकेलिप्रदेशादावूर्ध्वत्वदर्शनात् “पुरुषेणानेन भवितव्यम्” इति संभावनाप्रत्ययः।

न चायं संशयः, अश्वकेलिप्रदेशे पुरुषवत्स्थाणोरसंभाव्यत्वेन समकक्ष्यतया स्थाणुपुरुषयोरनुल्लेखात्। न च पुरुषनिर्णयो ऽयम्, रात्रावपि स्थाणुनिखननसंभावनया तत्पक्षस्य सर्वात्मनानपनोदात्, पुरुषनिश्चयहेतूनां च शिरःपाण्यादिविशेषाणामप्रतिभासात्।

स चायं तर्क एकतरपक्षशैथिल्यजननेन द्वितीयपक्षे प्रवर्तमानं न्यायं विषयशोधनद्वारेणानुगृह्णातीति पृथगुपदिश्यते।

## [9 निर्णयः]

पक्षप्रतिपक्षविषयसाधनोपालम्भपरीक्षया तदन्यतरपक्षावधारणं नि-

---

**1** °वूर्ध्वत्वदर्शनात् ] See section 3.2.1: यथोर्ध्वत्वदर्शनात्
**10** *Nyāyasūtra* 1.1.41 (quoted in NM II 592): विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः॥; *Syādvādaratnākara* 974.17 (Marui [2000:104, n.27]): पक्षप्रतिपक्षविषयसाधनोपलम्भपरीक्षया तदन्यतरपक्षावधारणं निर्णयः।

---

**3** NM II 586　**10** NM II 592

---

**1** °प्रत्ययरूप ऊहस्तर्क ] $E_dB_1B_2B_3G_1V_1$; °रूप ऊहस्तर्क $L_1$; °रूपस्तर्क $R_1$ **1** °देशादावूर्ध्वत्व° ] em.; °देशे ऊर्ध्वत्व° $E_dB_1^{pc}B_2G_1L_1R_1V_1$; °देशादावूर्ध्व° $B_1^{ac}B_3$ **3** न चायं ] $E_dB_1B_2B_3G_1L_1V_1$; स चायं न $R_1$ **3** °वत्स्थाणो° ] $E_dB_1B_2G_1L_1R_1V_1$; °वस्थाणो° $B_3$ **3** °भाव्यत्वेन ] $E_dB_2G_1L_1R_1V_1$; °भाव्यमानत्वेन $B_1B_3$ **4** समकक्ष्यतया ] $E_dB_1B_2B_3G_1V_1$; समकक्षतया $L_1$; समकक्षया $R_1$(marked) **4** स्थाणुपुरुष° ] $B_1B_3R_1$; स्थाणुत्वपुरुषत्व° $E_dB_2G_1L_1V_1$ **4** पुरुषनिर्णयो ऽयम् ] $E_dB_2G_1L_1R_1V_1$; पुरुषनिर्णेयं $B_1^{ac}$; पुरुषनिर्णयं $B_1^{pc}$; पुरुषनिर्णयो $B_3$ **5** °निखनन° ] $B_1B_2B_3G_1L_1R_1V_1$; °निरवनन° $E_d$ **5** °नानपनोदात् ] $B_2G_1L_1V_1$; °नानपनोदनात् $E_dB_1B_3^{pc}$; °नानपनदनात् $B_3^{ac}$; °ना ऽपनोदात् $R_1$ **6** च ] $E_dB_1B_2B_3G_1R_1V_1$; om. $L_1$ **7** द्वितीयपक्षे ] $B_1B_2B_3R_1$; द्वितीये पक्षे $E_dL_1V_1$; द्विती+प+ $G_1$ **7** प्रवर्तमानं ] $E_dB_1B_3L_1^{pc}R_1V_1$; प्रवर्तन° $B_2^{ac}L_1^{ac}$; प्रवर्तमान° $B_2^{pc}$; +++मानं $G_1$ **8** न्यायं ] $E_dB_1B_2B_3G_1R_1V_1$; न्याय्यं $L_1$ **8** विषय° ] $E_dB_1B_2^{pc}B_3G_1L_1R_1V_1$; विष° $B_2^{ac}$ **8** °गुपदिश्यते ] $B_1B_3$; °गुच्यते $E_dB_2G_1L_1R_1V_1$ **10** °नोपालम्भ° ] $E_dB_1B_2G_1L_1R_1V_1$; °नोपलम्भ° $B_3$ **10** °परीक्षया ] $E_dB_1B_3G_1L_1R_1V_1$; °परीक्षतया $B_2$

र्णयः। तदवसानश्च न्याय इति न्यायोपरमहेतुत्वात्पृथगसावुपदिश्य-
ते।

**1 न्याय ]** $E_d B_1 B_2 B_3 G_1 R_1$ ; **न्याय्य** $L_1 V_1$